# श्री-स्मरणमङ्गलस्त्रोतम्

रूपगोस्वामिविरचितम्

नीयल्देल्मानिकोनाम्ना सम्पादितमनुवादितं च

श्रीराधाप्राणबन्धोश्चरणकमलयोः केशशेषाद्यगम्या
या साध्या प्रेमसेवा व्रजचरितपरैर्गाढलौल्यैकलभ्या ।
सा स्यात् प्राप्ता यया तां प्रथयितुमधुना मानसीमस्य सेवां
भाव्यां रागाध्वपान्थैर्व्रजमनुचरितं नैत्यिकं तस्य नौमि ॥१ ॥

कुञ्जाद्गोष्ठं निशान्ते प्रविशति कुरुते दोहनान्नाशनाद्यां
प्रातः सायञ्च लीलां विहरति सखिभिः सङ्गवे चारयन् गाः ।
मध्याह्ने चाथ नक्तं विलसति विपिने राधयाद्धापराह्ने
गोष्ठं याति प्रदोषे रमयति सुहृदो यह् स कृष्णोऽवतान्नः॥२ ॥

रात्र्यन्ते त्रस्तवृन्देरितबहुविरवैर्बोधितौ कीरशारी-
पद्यैर्हृद्यैरहृद्यैरपि सुखशयनादुत्थितौ तौ सखीभिः ।
दृष्टौ हृष्टौ तदात्वोदितरतिललितौ कक्खटीगीःसशङ्कौ
राधाकृष्णौ सतृष्णावपि निजनिजधाम्न्याप्ततल्पौ स्मरामि ॥३ ॥

राधां स्नात-विभूषितां व्रजपयाहूतां सखीभिः प्रगे
तद्गेहे विहितान्नपाकरचनां कृष्णावशेषाशनां ।
कृष्णं बुद्धमवाप्तधेनुसदनं निर्व्यूढगोदोहनं
सुस्नातं कृतभोजनं सहचरैस्ताञ्चाथ तञ्चाश्रये ॥४ ॥

पूर्वाह्ने धेनुमित्रैर्विपिनमनुसृतं गोष्ठलोकानुयातं
कृष्णं राधाप्तिलोलं तदभिसृतिकृते प्राप्ततत्कुण्डतीरम् ।
राधाञ्चालोक्य कृष्णं कृतगृहगमनार्ययार्कार्चनायै
दिष्टां कृष्णप्रवृत्त्यै प्रहितनिजसखीवर्त्मनेत्रां स्मरामि ॥५ ॥

मध्याह्नेऽन्योन्यसङ्गोदितविविधविकारादिभूषाप्रमुग्धौ
वाम्योत्कण्ठातिलोलौ स्मरमखललिताद्यालिनर्माप्तशातौ ।
दोलारण्याम्बुवंशीहृतिरतिमधुपानार्कपूजादिलीलौ
राधाकृष्णौ सतृष्णौ परिजनघटया सेव्यमानौ स्मरामि ॥६ ॥

श्रीराधां प्राप्तगेहां निजरमणकृते क्लृप्तनानोपहारां

सुस्नातां रम्यवेशां प्रियमुखकमलालोकपूर्णप्रमोदाम् ।
कृष्णञ्चैवापराह्णे व्रजमनुचलितं धेनुवृन्दैर्वयस्यैः
श्रीराधालोकतृप्तं पितृमुखमिलितं मातृमृष्टं स्मरामि ॥ ७ ॥

सायं राधा स्वसख्या निजरमणकृते प्रेषितानेकभोज्यां
सख्यानीतेशशेषाशनमुदितहृदं ताञ्च तञ्च व्रजेन्दुम् ।
सुस्नातं रम्यवेशं गृहमनुजननीलालितं प्राप्तगोष्ठं
निर्व्यूढोस्रालिदोहं स्वगृहमनु पुनर्भुक्तवन्तं स्मरामि ॥ ८ ॥

राधां सालीगणान्तामसितसितनिशायोग्यवेशां प्रदोषे
दूत्या वृन्दोपदेशादभिसृतयमुनातीरकल्पागकुञ्जां ।
कृष्णं गोपैः सभायां विहितगुणिकलालोकनं स्निग्धमात्रा
यत्नादानीय संशायितमथ निभृतं प्राप्तकुञ्जं स्मरामि ॥ ९ ॥

तावुत्कौ लब्धसङ्गौ बहुपरिचरणैर्वृन्दयाराध्यमानौ
गानैर्नर्मप्रहेलीसुलपननटनैः रासलास्यादिरङ्गैः ।
प्रेष्ठालीभिर्लसन्तौ रतिगतमनसौ मृष्टमाध्वीकपानौ
क्रीडाचार्यौ निकुञ्जे विविधरतिरणोद्धृत्यविस्तारितान्तौ ॥ १० ॥

ताम्बूलैर्गन्धमाल्यैर्व्यजनहिमपयःपादसंवाहनाद्यैः
प्रेम्णा संसेव्यमानौ प्रणयिसहचरीसञ्चयेनाप्तशातौ ।
वाचा कान्तैरणाभिर्निभृतरतिरसैः कुञ्जसुप्तालिसङ्घौ
राधाकृष्णौ निशायां सुकुसुमशयने प्राप्तनिद्रौ स्मरामि ॥ ११ ॥